महावि० का नाम
आ० वि० सं० महावि० रहीमपुर, रवाड़िया।
दिनाङ्क 6·12·2020
उपशास्त्री द्वितीयवर्ष
व्याकरण
भाग 9।

विषय – बहुव्रीहि समास प्रकरणम्।

कल्याणी पञ्चमी यासां रात्रीणां ताः कल्याणी
पञ्चमा रात्रयः। स्त्री प्रमाणी यस्य स स्त्रीप्रमाणः।
'पुंवद्भाव प्रतिषेधोऽप्रत्ययश्च प्रधान पूरण्यामेव'
रात्रिः पूरणी वाच्या चेत्युक्तो दाहरणे पूरण्या।
अन्यत्र तु 'नद्यृतश्च' नद्युत्तरपदार्थन्तोत्तरपदाद्
बहुव्रीहेः कप्स्यात्। पुंवद्भावः।
शेषो बहुव्रीहिः। त्रिकस्येति। विभक्तेरित्यर्थः।
ननु 'द्वितीया श्रित' इति 'तृतीया तत्कृत' – इति 'चतुर्थी
तदर्थ' – इति 'पञ्चमी भयेन' इति 'षष्ठी' इति
'सप्तमी शौण्डैः' इति च द्वितीयादि विभक्तीनां षण्णां
समासो विहितः। विशेषणं विशेष्येणेत्यादिना तु
प्रथमाया अपि समासो विहितः, अतः शेष विभक्ति-
र्दुर्लभेत्यत आह – विशिष्येति। विशेषण-
समासस्य वस्तुतः प्रथमाविभक्तौ प्रवृत्तावपि प्रथमा
विभक्तिं विशिष्य उच्चार्य विधानाभावात् समास-
विधिषु विशिष्य निर्दिष्ट द्वितीयादि विभक्त्यपे-
क्षया शेषः प्रथमा विभक्तिरिति भावः। तदाह –
'प्रथमान्त मित्यर्थः' इति। एतच्च भाष्ये स्पष्टम्।
'अनेकमन्यपदार्थे' 'प्रथमान्तमिति'। बहुव्रीहिरिति
शेष ग्रहणानुवृत्ति लभ्यमिदम्। एवं च सुप्सुपेति
नानुवर्तते, प्रयोजनाभावात्। अनेकं सुबन्तमिति
पाठेऽपि प्रथमान्तमित्यर्थः। 'अन्येति'। उपस्थित
प्रथमान्तातिरिक्तेत्यर्थः। एवं च ~~पञ्चमी~~ पञ्चभि-
र्भुक्तमन्नं यस्य स पञ्चभुक्त इति बहुव्रीहि

निवृत्यर्थं 'बहुव्रीहिः समानाधिकरणानामिति वक्तव्यम्'
इति वार्तिकं पदभाष्ये स्थितम्, यथा वृक्षे देवे यो
गतः स वृक्षदेव इति बहुव्रीहि निवृत्यर्थम् 'अप्रथमा-
विभक्त्यर्थे बहुव्रीहिर्वक्तव्यः' इति वार्तिकम्,
तदुभयमपि न कर्तव्यमित्याह 'अप्रथमाविभक्त्यर्थे
बहुव्रीहिरिति समानाधिकरणानामिति च फलितमिति।
शेषग्रहणादिति शेषः। शेषग्रहणात् प्रथमान्त इति
लभ्यत इति हि भाष्यम्। पञ्चभिर्भुक्तमस्य इत्यत्र
च समस्यमान पदयोरेकस्या प्रथमान्तत्वेन बहु-
व्रीहिरिति फलितम्। प्रथमान्तातिरिक्तस्य पदस्यार्थे
वर्तमानं समस्यते इत्यर्थाश्रयणाद् वृक्षे देवे गत
इत्यत्रापि न बहुव्रीहिरिति फलितमिति भावः।
तत्र द्वितीयार्थे बहुव्रीहिमुदाहरति — 'प्राप्तमिति'।
'गत्यर्थाकर्मक' इति कर्तरि क्तः। अत्र विग्रह वाक्ये
ग्रामकर्मक प्राप्तिकर्तृ उदकमित्येवं ग्रामस्य विशेषणतया,
विशेष्यत्वेन तु प्राप्तस्य उदकस्य बोधः। समासे
तु एकार्थीभाव महिम्ना उदककर्तृकप्राप्तिकर्मीभूतो
ग्राम इत्येवं ग्रामस्य विशेष्यतया, तद्विशेषणतया
तु प्राप्तस्य उदकस्य बोधः। एवमुत्तरत्रापि विशेषण
विशेष्य भावव्यत्यासो ज्ञेयः। अथ तृतीयार्थे बहुव्रीहि-
मुदाहरति — ऊढरथोऽनड्वानिति। ऊढो रथो येनेति
विग्रहः। अथ चतुर्थ्यर्थे बहुव्रीहिमुदाहरति —
'उपहृत पशू रुद्र इति'। उपहृतः पशुः यस्मै इति विग्रहः।
अथ पञ्चम्यर्थे बहुव्रीहिमुदाहरति — 'उद्धृतौदना स्थालीति'। उद्धृत ओदनो यस्या इति
बहुव्रीहिः। अथ षष्ठ्यर्थे बहुव्रीहिमुदाहरति —
'पीताम्बरो हरिरिति'। पीतमम्बरं यस्येति विग्रहः।
अथ सप्तम्यर्थे बहुव्रीहिमुदाहरति —

Sunday 22

NOTES

दिनेश प्र० सिंह
एसोसियेट प्रोफेसर
व्याकरण

DEC

Scanned with CamScanner